# Ganapatyadidevatanam Dhyanakramah

# ગણપત્યાદિદેવતાનાં ધ્યાનક્રમઃ

## Document Information

Text title : Ganapatyadidevatanam Dhyanakramah

File name : gaNapatyAdidevatAnAMdhyAnakramaH.itx

Category : ganesha, dhyAnam

Location : doc_ganesha

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# ગણપત્યાદિદેવતાનાં ધ્યાનક્રમઃ

૧. શ્રીપઞ્ચમુખહેરમ્બગણપતિધ્યાનં
મુક્તાકાઞ્ચનનીલકુન્દઘુસૃણચ્છાયૈસ્ત્રિણેત્રાઞ્ચિતૈઃ
    નાગાસ્યૈર્હરિવાહનં શશિધરં હેરમ્બમર્કપ્રભમ્ ।
દૃપ્તં દાનમભીતિમોદકરદાનબ્જં શિરોઽક્ષાત્મિકાં
    માલાં મુદ્ગરમઙ્કુશં ત્રિશિખકં દોર્ભિર્દધાનં ભજે ॥ ૧॥

૨. શ્રીસુબ્રહ્મણ્યધ્યાનં
ધ્યાયેદીપ્સિતસિદ્ધિદં શિવસુતં શ્રીદ્વાદશાક્ષં ગુહં
    ખેટં કુક્કુટમઙ્કુશં ચ વરદં પાશં ધનુશ્ચક્રકમ્ ।
વજ્રં શક્તિમસિં ચ શૂલમભયં દોર્ભિર્ધૃતં ષણ્મુખં
    દેવં ચિત્રમયૂરવાહનગતં ચિત્રામ્બરાલઙ્કૃતમ્ ॥ ૨॥

૩. શ્રીવલ્લીદેવીધ્યાનં
શ્યામાં શ્યામાલકાન્તાં દ્રુતકનકમણિપ્રસ્ફુરદ્દિવ્યભૂષાં
    ગુઞ્જામાલાભિરામાં શિવમુનિતનયાં કાનનેન્દ્રાભિમાન્યામ્ ।
વામે હસ્તે ચ પદ્મં તદિતરકરવરં લમ્બિતં સન્દધાનાં
    સંસ્થાં સેનાનિદક્ષે સમુદમપિ મહાવલ્લિદેવીં ભજેઽહમ્ ॥ ૩॥

૪. શ્રીદેવસેનાધ્યાનં
રક્તાભાં રક્તવસ્ત્રાં મણિમયખચિતાનેકભૂષાભિરામાં
    દેવીં માહેન્દ્રમાન્યાં મધુરિપુનયનાદુદ્ભવાં દેવસેનામ્ ।
દક્ષે હસ્તે ચ પદ્મં ત્વિતરકરવરં લમ્બિતં સન્દધાનાં
    સંસ્થાં સ્કન્દસ્ય વામે સમુદમપિ ગુહં લોકયન્તીં ભજેઽહમ્ ॥ ૪॥

૫. નવ વીરાઃ ।
પ્રથમો વીરબાહુઃ સ્યાત્ દ્વિતીયો વીરકેસરી ।
તૃતીયો વીરમાહેન્દ્રઃ તુર્યો વીરમહેશ્વરઃ ॥ ૫॥

વીરપુરન્દરઃપઞ્ચમઃ ષષ્ઠો વીરરાક્ષસઃ ।

સપ્તમો વીરમાર્તાણ્ડો વીરાન્તક ઇહાષ્ટમઃ ॥ ૬॥

નવમો વીરધીરશ્ચ નવ વીરા ઇમે ક્રમાત્ ।
ગૌરીપાદસરોદ્ભૂતનવરત્નલતાત્મજાઃ ॥ ૭॥

તત્તદ્રત્નસમાનાઙ્ગશોભામ્બરવિભૂષણાઃ ।
સાસિખેટાસ્સદા સેવ્યાઃ સ્કન્દસેનાધિપા વરાઃ ॥ ૮॥

૫.૧ - શ્રીવીરબાહુધ્યાનમ્ ।
અમ્બાનૂપુરરત્નકિઙ્કિણિમણેર્જાતા પુરા યાઽબલા
    ખ્યાતા રત્નલતેતિ સદ્ગુણવતી તસ્યાસ્સુતો ધૈર્યવાન્ ।
હસ્તામ્ભોજધૃતાસિખેટકવરઃ શ્રીવીરબાહુર્મહાન્
    ધ્યેયોવર્મકિરીટકુણ્ડલધરઃ સેનાનિવીરાદિમઃ ॥ ૯॥

૫.૨ - શ્રીવીરકેસરીધ્યાનમ્ ।
ગૌરીનૂપુર મૌક્તિકાત્તરલવલ્લ્યાખ્યા પુરા યાઽભવત્
    તસ્યાઃ પુત્રવરઃ સુરેન્દ્રવિનુતઃ શ્રીવીરકેસર્યસૌ ।
ખડ્ગં ખેટકમાવહન્ કરયુગે મુક્તામણીભૂષણઃ
    સેવ્યો વર્મનિષઙ્ગહેતિવિપુલો વીરદ્વિતીયો બલી ॥ ૧૦॥

૫.૩ - શ્રીવીરમાહેન્દ્રધ્યાનમ્ ।
અમ્બાનપુરપુષ્યરાગમણિજા યા પુષ્પવલ્લીસમા
    ખ્યાતા કાન્તિમતી સુભૂષણવતી તસ્યાઃ સુતો ભીષણઃ ।
શ્રીમાન્વીરમહેન્દ્ર ઇત્યભિધયા ખ્યાતસ્તૃતીયોઽપરઃ
    ખડ્ગં ખેટકમાવહન્નિષુધિભૃત્સાન્નિધ્યમેતુ પ્રભુઃ ॥ ૧૧॥

૫.૪ - શ્રીવીરમાહેશ્વરધ્યાનમ્ ।
દેવીમઞ્જીરગોમેદકમણિવરજા યા ચ ગોમેદવલ્લી
    તસ્યાઃ સૂનુર્નિતાન્તં સુરકુલહિતકૃદ્ વીરમાહેશ્વરાખ્યઃ ।
સેનાસન્નાહકોલાહલ રવમુદિતઃ ખડ્ગખેટાભિરામઃ
    સુબ્રહ્મણ્યાન્તરઙ્ગો વિપુલકરયુગઃ સેવિતસ્તુર્યવીરઃ ॥ ૧૨॥

૫.૫ શ્રીવીરપુરન્દરધ્યાનમ્ ।
હેમાદ્રિપ્રભવાપદાબ્જવિલસચ્છ્રીનૂપુરાન્નિર્ગલદ્
    વૈડૂર્યોપલસમ્ભવા ગુણવતી વૈડૂર્યવલ્લીતિ યા ।
તસ્યાસ્સૂનુરુદારધીઃ પ્રવિલસત્ખેટાસિમાન્ પઞ્ચમઃ
    શ્રીમાન્ વીરપુરન્દરો વિજયતે સ્કન્દસ્ય સેનાપતિઃ ॥ ૧૩॥

૫.૬ શ્રીવીરરાક્ષસધ્યાનમ્ ।
જાતા યા વજ્રવલ્લી તુહિનગિરિભવાપાદમઞ્જીરવજ્રાત્
તસ્યાઃ સૂનુર્બલાઢ્યો યુધિ વિજિતરિપુઃ વીરયુગ્રાક્ષસેન્દ્રઃ ।
ખેટપ્રાસોરુહસ્તો જ્વલિતનિજવપુઃ સ્કન્દસેનાધિનાથઃ
ષષ્ઠસ્સવ્યાપસવ્યાહવહતદિતિજઃ પૂજનીયો વરેણ્યઃ ॥ ૧૪॥

૫.૭ શ્રીવીરમાર્તાણ્ડધ્યાનમ્ ।
જાતા દેવ્યઙ્ઘ્રિભૂષાન્મરતકલવલીત્યાખ્યયા વિશ્રુતા યા
તસ્યાસ્સૂનુઃ પ્રસિદ્ધો નવમણિમકુટો વીરમાર્તાણ્ડસંજ્ઞઃ ।
વિદ્યુત્કલ્પોઽસિખેટોલ્લસિતકરયુગઃસપ્તમોઽભેદ્યવર્મા
સેવ્યઃ સેનાનિસેનાપતિરતુલબલો દૈત્યહા દેવવન્દ્યઃ ॥ ૧૫॥

૫.૮ શ્રીવીરાન્તકધ્યાનમ્ ।
અમ્બાયાસ્તુ પુરા પ્રવાલલવલી ખ્યાતા ચ યા નૂપુરાત્
જાતા તત્તનયોઽતુલોઽધિકબલો વીરાન્તકાખ્યઃ સુધીઃ ।
શ્રીમાન્ખેટકખડ્ગભૃત્કરયુગઃ સેનાનિવીરાષ્ટમઃ
સઙ્ગ્રામાન્તરધીરકૃત્યમુદિતસ્કન્દઃ સદાઽભ્યર્ચિતઃ ॥ ૧૬॥

૫.૯ શ્રીવીરધીરધ્યાનમ્ ।
અમ્બાપાદસરેન્દ્રનીલમણિજા યા નીલવલ્લી સુદૃક્
તસ્યાસ્સૂનુરઘોરસઙ્ગરમુખે દૈત્યાન્તકઃ ખેટભૃત્ ।
ખડ્ગી કઞ્ચુકઝલ્લટાદિવિપુલઃ શ્રીવીરધીરાભિધઃ
સુબ્રહ્મણ્યસુવીરવર્યનવમઃ સૌખ્યં સદા યચ્છતાત્ ॥ ૧૭॥

યે પઠન્તિ સ્તુતિં નિત્યં જયં સર્વત્ર સર્વદા ।
વીરાંશ્ચ તનયાન્ કીર્તિં લભન્તે વિપુલાં શ્રિયમ્ ॥ ૧૮॥

કન્યકા પ્રત્યહં પ્રાતઃ પઠેત્પત્યર્થમાદરાત્ ।
ષણ્માસાલ્લભતે વીરં ભર્તારં સતતં પ્રિયમ્ ॥ ૧૯॥

સર્વરોગહરં પુણ્યં ભૂતાદીનાં વિનિગ્રહમ્ ।
વિષઘ્નમુત્તમં સ્તોત્રં પઠતાં સર્વસિદ્ધિદમ્ ॥ ૨૦॥

ઇતિ શ્રીસ્કાન્દપુરાણાન્તર્ગતઃ ગણપત્યાદિદેવતાનાં ધ્યાનક્રમઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

*Ganapatyadidevatanam Dhyanakramah*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*